विनियोगः—ॐ अस्य श्री **'किं त्वत्र यत् प्रतिज्ञातं'** इति सप्तशती-चतुर्थ-शतकस्य अष्ट-सप्तति-मन्त्रस्य श्रीमहा-सरस्वती ऋषिः, श्रीमहा-सरस्वती देवता, फ्रें वीजं, श्रीविकृति शक्तिः, श्रीसुन्दरी महा-विद्या, सतो गुणः, श्रोतृ ज्ञानेन्द्रियं, मोह रसः, वाक् कर्मेन्द्रियं, सौम्य स्वरः, जल तत्त्वं, प्रतिष्ठा कला, ह्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य अष्ट-सप्तति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीमहा-सरस्वती-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, फ्रें बीजाय नमः षडारे—लिङ्गे, श्रीविकृति-शक्त्यै नमः दशारे —नाभौ, श्रीसुन्दरी-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणायः नमः अन्तरारे— मनसि, श्रोतृ-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, मोह-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः कर-तले, ह्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य अष्ट-सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं फ्रें	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
किं त्वत्र यत् प्रतिज्ञातं	मध्यमाभ्यां वषट्	शिखायै वषट्
मिथ्या तत् क्रियते कथं	अनामिकाभ्यां हुम्	कवचाय हुम्
श्रूयतामल्प-बुद्धित्वात्	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
प्रतिज्ञा या कृता पुरा	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **श्रेयस्करि! प्रणत-वत्सलता त्वयाति वाचं,**
शृणोषि सरलां सरसां च सत्याम्।
भक्त्या नतोऽस्मि विनतोऽस्मि सुमङ्गले!
त्वत्-पादाम्बुजे प्रणिहिते मयि सन्निधित्वम्॥

ॐ ऐं फ्रें नमः किं त्वत्र यत् प्रतिज्ञातं, मिथ्या तत् क्रियते कथं?
श्रूयतामल्प - बुद्धित्वात्, प्रतिज्ञा या कृता पुरा नमो फ्रें ऐं ॐ॥३७८

१००० जपात् सिद्धिः, तिल-मांस-घृतैर्होमः, पालाश समिधा।

* * *

३७६

विनियोगः—ॐ अस्य श्री **'यो मां जयति संग्रामे'** इति सप्तशती-चतुर्थ-शतकस्य नव-सप्तत-मन्त्रस्य श्रीमहा-सरस्वती ऋषिः, श्रीमहा-सरस्वती देवता, रूं वीजं, श्रीसुकृति शक्तिः, श्रीछिन्नमस्ता महा-विद्या, सतो गुणः, घ्राण ज्ञानेन्द्रियं, मोह रसः, वाक् कर्मेन्द्रियं, सौम्य स्वरः, भू तत्त्वं, निवृत्ति (अग्नि-प्रधान) कला, ऐं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य नव-सप्तत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीमहा-सरस्वती-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, रूं वीजाय नमः षडारे—लिङ्गे, श्रीसुकृति-शक्त्यै नमः दशारे —नाभौ, श्रीछिन्नमस्ता-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणायः नमः अन्तरारे— मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, मोह-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे—गुदे, निवृत्ति (अग्नि-प्रधान)-कलायै नमः कर-तले, ऐं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य नव-सप्तत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं रूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
यो मां जयति संग्रामे	मध्यमाभ्यां वषट्	शिखायै वषट्
यो मे दर्पं व्यपोहति	अनामिकाभ्यां हुम्	कवचाय हुम्
यो मे प्रति-बलो लोके	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
स मे भर्त्ता भविष्यति	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **आताम्रार्क-सहस्र-दीप्ति-परमा सौन्दर्य-सौर-रत्नम्,**
लोकातीत - महोदयैरुपयुता सर्वोपमा - गोचरैः।
नानानर्घ्य-विभूषणैरगणितै र्जाज्वल्यमानाचिरम्,
संग्रामस्य जयेन निश्चित-वधूर्भर्त्ता सदा पातु माम्॥

ॐ ऐं रूं नमः यो मां जयति संग्रामे, यो मे दर्पं व्यपोहति।
यो मे प्रति-बलो लोके, स मे भर्ता भविष्यति नमो रूं ऐं ॐ॥३७६॥

१००० जपात् सिद्धिः, तिल-पायस-मांस-घृतैर्होमः, पालाश-खदिर-समिधा।

* * *

३८०

विनियोगः—ॐ अस्य श्री **'तदाऽऽगच्छतु'** इति सप्तशती-चतुर्थ-शतकस्य अशीति-मन्त्रस्य श्रीमहा-सरस्वती ऋषिः, श्रीमहासरस्वती देवता, च्छूं बीजं, श्रीविश्वकृति शक्तिः, श्रीभुवनेश्वरी महा-विद्या, सतो गुणः, घ्राण ज्ञानेन्द्रियं, मोह रसः, पाद कर्मेन्द्रियं, सौम्य स्वरः, भू तत्त्वं, निवृत्ति (अग्नि-प्रधान) कला, ऐं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त चतुर्थ-शतकस्य अशीति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीमहासरस्वती-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, च्छूं बीजाय नमः षडारे—लिङ्गे, श्रीविश्वकृति-शक्त्यै नमः दशारे —नाभौ, श्रीभुवनेश्वरी-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणायः नमः अन्तरारे —मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, मोह-रसाय नमः चेतसि, पाद-कर्मेन्द्रियाय नमः पाद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, भू-तत्वाय नमः चतुरारे—गुदे, निवृत्ति-कलायै नमः कर-तले, ऐं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य अशीति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं च्छूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
तदाऽऽगच्छतु शुम्भोऽत्र	मध्यमाभ्यां वौषट्	शिखायै वौषट्
निशुम्भो वा महाऽसुरः	अनामिकाभ्यां हुम्	कवचाय हुम्
मां जित्वा किं चिरेणात्र	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
पाणिं गृह्णातु मे लघु	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **आताम्रार्क-सहस्र-दीप्ति-परमा सौन्दर्य-सौर-रत्नम्,**

लोकातीत - महोदयैरुपयुता सर्वोपमा - गोचरैः।

नानानर्घ्य-विभूषणैरगणितै र्जाज्वल्यमानाचिरम्,

संग्रामस्य जयेन निश्चित-वधूर्काली सदा पातु माम्।।

ॐ ऐं च्छूं नमः तदाऽऽगच्छतु शुम्भोऽत्र, निशुम्भो वा महाऽसुरः।

मां जित्वा किं चिरेणात्र, पाणिं गृह्णातु मे लघु नमो च्छूं ऐं ॐ।।३८०।।

१००० जपात् सिद्धिः, घृत-पायस-तिलैर्होमः, पालाश-समिधा।

* * *

३८१

विनियोगः—ॐ अस्य श्री **'दूत उवाच'** इति सप्तशती-चतुर्थ-शतकस्य एकाशीति-मन्त्रस्य श्रीमार्कण्डेय ऋषिः, श्रीमहा-काली देवता, ल्हूं वीजं, श्रीसृष्टि शक्तिः, श्रीपीताम्बरा महा-विद्या, तमो गुणः, घ्राण ज्ञानेन्द्रियं, उन्माद रसः, वाक् कर्मेन्द्रियं, सौम्य स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य एकाशीति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीमार्कण्डेय-ऋषये नमः सहस्त्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, ल्हूं वीजाय नमः षडारे—लिङ्गे, श्रीसृष्टि-शक्त्यै नमः दशारे—नाभौ, श्रीपीताम्बरा-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, उन्माद-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य एकाशीति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ल्हूं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं ल्हूं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
दूत उवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **शरत्-पूर्ण-चन्द्र-प्रभां पूर्ण-विम्बाधर-स्मेर-वक्त्रारविन्द-श्रियं ते।**
सु-नासा-पुटं पद्म-पत्रायताक्षीं स्थिता दर्शने दूत-सुग्रीवकस्य॥

ॐ ऐं ल्हूं नमः दूत उवाच नमो ल्हूं ऐं ॐ॥३८१॥

१०००/ जपात् सिद्धिः, घृत-पायस-तिलैर्होमः।

* * *

३८२

विनियोगः—ॐ अस्य श्री **'अवलिप्ताऽसि मैवं'** इति सप्तशती-चतुर्थ-शतकस्य द्व्यशीति-मन्त्रस्य श्रीसुग्रीव ऋषिः, श्रीमहा-काली देवता, कं वीजं, श्रीस्थिति शक्तिः, श्रीपीताम्बरा महा-विद्या, तमो गुणः, घ्राण ज्ञानेन्द्रियं, उन्माद रसः, कर कर्मेन्द्रियं, सौम्य स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य द्व्यशीति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीसुग्रीव-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, कं वीजाय नमः षडारे—लिङ्गे, श्रीस्थिति-शक्त्यै नमः दशारे—नाभौ, श्रीपीताम्बरा-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, उन्माद-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे— गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य द्व्यशीति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं कं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
अवलिप्ताऽसि मैवं त्वं	मध्यमाभ्यां वषट्	शिखायै वषट्
देवि! ब्रूहि ममाग्रतः	अनामिकाभ्यां हुम्	कवचाय हुम्
त्रैलोक्ये कः पुमांस्तिष्ठेद्	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
अग्रे शुम्भ-निशुम्भयोः	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **गायत्री सशिरास्तुरीय-सहिता सन्ध्या-मयीत्यागमै—**

राख्याता त्रिपुरे! त्वमेव महतां शर्म-प्रदा कर्मणाम्।

तत्तद्-दर्शन-मुख्य-शक्तिरपि च त्वं ब्रह्म-कर्मेश्वरी,

अन्न-प्राण-मनो-प्रबोध-परमा युद्ध-प्रिया कालिका॥

ॐ ऐं कं नमः अवलिप्ताऽसि मैवं त्वं, देवि! ब्रूहि ममाग्रतः।

त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भ-निशुम्भयोः नमो कं ऐं ॐ॥३८२॥

१००० जपात् सिद्धिः, मांस-घृत-तिलैर्होमः, पालाश-खदिर-काष्ठैश्च समिधा।

* * *

३८३

विनियोगः—ॐ अस्य श्री **'अन्येषामपि दैत्यानां'** इति सप्तशती-चतुर्थ-शतकस्य त्र्यशीति-मन्त्रस्य श्री सुग्रीव ऋषिः, श्रीमहा-काली देवता, द्रें बीजं, श्रीसंहति शक्तिः, श्रीपीताम्बरा महा-विद्या, तमो गुणः, त्वक् ज्ञानेन्द्रियं, उन्माद रसः, पाद कर्मेन्द्रियं, सौम्य स्वरः, वायु तत्त्वं, शान्ति कला, क्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य त्र्यशीति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीसुग्रीव-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-देवतायै नमः द्वादशारे—हृदि, द्रें बीजाय नमः षडारे—लिङ्गे, श्रीसंहति-शक्त्यै नमः दशारे—नाभौ, श्रीपीताम्बरा महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, उन्माद-रसाय नमः चेतसि, पाद-कर्मेन्द्रियाय नमः पाद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, वायु-तत्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य त्र्यशीति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं द्रें	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
अन्येषामपि दैत्यानां	मध्यमाभ्यां वषट्	शिखायै वषट्
सर्वे देवा न वै युधि	अनामिकाभ्यां हुम्	कवचाय हुम्
तिष्ठन्ति सम्मुखे देवि!	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
किं पुनः स्त्री त्वमेकिका	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **गायत्री सशिरास्तुरीय-सहिता सन्ध्या-मयीगत्यागमै—**
राख्याता त्रिपुरे! त्वमेव महतां शर्म-प्रदा कर्मणाम्।
तत्तद्-दर्शने-मुख्य-शक्तिरपि च त्वं ब्रह्म-कर्मेश्वरी,
अन्न-प्राण-मनो-प्रबोध-परमा युद्ध-प्रिया कालिका॥

ॐ ऐं द्रें नमः अन्येषामपि दैत्यानां, सर्वे देवा न वै युधि।
तिष्ठन्ति सम्मुखे देवि! किं पुनः स्त्री त्वमेकिका नमो द्रें ऐं ॐ॥३८३॥

१००० जपात् सिद्धिः, घृत-मांस-तिलैर्होमः, पालाश-खदिर-काष्ठैश्च समिधा।

* * *

३८४

विनियोगः—ॐ अस्य श्री **'इन्द्राद्याः सकला देवाः'** इति सप्तशती-चतुर्थ-शतकस्य चतुरशीति-मन्त्रस्य श्रीसुग्रीव ऋषिः, श्रीमहा-काली देवता, श्रीं वीजं, श्रीसन्ध्या शक्तिः, श्रीज्येष्ठा महा-विद्या, तमो गुणः, त्वक् ज्ञानेन्द्रियं, उन्माद रसः, गुद कर्मेन्द्रियं, सौम्य स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य चतुरशीति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीसुग्रीव-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, श्रीं वीजाय नमः षडारे—लिङ्गे, श्रीसन्ध्या-शक्त्यै नमः दशारे—नाभौ, श्रीज्येष्ठा-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, उन्माद-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य चतुरशीति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ श्रीं नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
इन्द्राद्याः सकला देवाः	मध्यमाभ्यां वषट्	शिखायै वषट्
तस्थुर्येषां न संयुगे	अनामिकाभ्यां हुम्	कवचाय हुम्
शुम्भादीनां कथं तेषां	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
स्त्री प्रयास्यसि सम्मुखं	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **गायत्री सशिरास्तुरीय-सहिता सन्ध्या - मयीत्यागमै—**

राख्याता त्रिपुरे! त्वमेव महतां शर्म-प्रदा कर्मणाम्।

तत्तद्-दर्शने-मुख्य-शक्तिरपि च त्वं ब्रह्म-कर्मेश्वरी,

अन्न-प्राण-मनो-प्रबोध-परमा युद्ध-प्रिया कालिकाः॥

ॐ ऐं श्रीं नमः इन्द्राद्या सकला देवाः, तस्थुर्येषां न संयुगे।

शुम्भादीनां कथं तेषां, स्त्री प्रयास्यसि सम्मुखम् नमो श्रीं ऐं ॐ।।।३८४॥

१००० जपात् सिद्धिः, मांस-घृत-तिलैर्होमः, पालाश-खदिर-काष्ठैश्च समिधा।

* * *

३८५

विनियोगः—ॐ अस्य श्री **'सा त्वं गच्छ मयैवोक्ता'** इति सप्तशती-चतुर्थ-शतकस्य पञ्चाशीति मन्त्रस्य श्रीसुग्रीव ऋषिः, श्रीमहा-काली देवता, सां बीजं, श्रीवन्ध्या शक्तिः, श्रीज्येष्ठा महा-विद्या, तमो गुणः, त्वक् ज्ञानेन्द्रियं, उन्माद रसः, गुद कर्मेन्द्रियं, सौम्य स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य पञ्चाशीति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीसुग्रीव-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, सां वीजाय नमः षडारे—लिङ्गे, श्रीवन्ध्या-शक्त्यै नमः दशारे—नाभौ, श्रीज्येष्ठा-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणायः नमः अन्तरारे—मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, उन्माद-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य पञ्चाशीति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं सां	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
सा त्वं गच्छ मयैवोक्ता	मध्यमाभ्यां वषट्	शिखायै वषट्
पार्श्वं शुम्भ-निशुम्भयोः	अनामिकाभ्यां हुम्	कवचाय हुम्
केशाकर्षण-निर्धूत-	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
गौरवा मा गमिष्यसि	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— गायत्री सशिरास्तुरीय-सहिता सन्ध्या-मयीत्यागमै—

राख्याता त्रिपुरे! त्वमेव महतां शर्म-प्रदा कर्मणाम्।

तत्तद्-दर्शन-मुख्य-शक्तिरपि च त्वं ब्रह्म-कर्मेश्वरी,

अन्न-प्राण-मनो-प्रबोध-परमा युद्ध-प्रिया कालिका॥

ॐ ऐं सां नमः सा त्वं गच्छ मयैवोक्ता, पार्श्वं शुम्भ-निशुम्भयोः।

केशाकर्षण - निर्धूत - गौरवा मा गमिष्यसि नमो सां ऐं ॐ॥३८५॥

१००० जपात् सिद्धिः, मांस-घृत-तिलैर्होमः, पालाश-खदिर-काष्ठैश्च समिधा।

* * *

३८६

विनियोगः—ॐ अस्य श्री **'देव्युवाच'** इति सप्तशती-चतुर्थ-शतकस्य षडशीति-मन्त्रस्य श्रीमार्कण्डेय ऋषिः, श्रीमहा-लक्ष्मी देवता, ह्रीं वीजं, श्रीत्रिशूलिनी शक्तिः, श्रीमातङ्गी महा-विद्या, रजो गुणः, रसना ज्ञानेन्द्रियं, हास्य रसः, गुद कर्मेन्द्रियं, सौम्य स्वरः, वायु तत्त्वं, शान्ति कला, श्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य षडशीति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीमार्कण्डेय-ऋषये: नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, ह्रीं वीजाय नमः षडारे—लिङ्गे, श्रीत्रिशूलिनी-शक्त्यै नमः दशारे— नाभौ, श्रीमातङ्गी-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे— मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, हास्य-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, वायु-तत्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः कर-तले, श्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य षडशीति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	षडङ्ग-न्यासः
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमो	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ह्रीं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं ह्रीं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
देव्युवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम्,**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रसन्नाननाम्,
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम्।।

ॐ ऐं ह्रीं नमः **देव्युवाच** **नमो ह्रीं ऐं ॐ।।३८६।।**

१००० जपात् सिद्धिः, मांस-घृत-तिलैर्होमः, पालाश-खदिर-काष्ठैश्च समिधा।

* * *

३८७

विनियोगः— ॐ अस्य श्री **'एवमेतद् बली शुम्भो'** इति सप्तशती-चतुर्थ-शतकस्य सप्ताशीति-मन्त्रस्य श्रीमहा-सरस्वती ऋषिः, श्रीमहा-लक्ष्मी देवता, ऐं वीजं, श्रीवाणा शक्तिः, श्रीमातङ्गी महा-विद्या, रजो गुणः, रसना ज्ञानेन्द्रियं, हास्य रसः, लिङ्ग कर्मेन्द्रियं, सौम्य स्वरः, वायु तत्त्वं, शान्ति कला, श्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्तचतुर्थ-शतकस्य सप्ताशीति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमहा-सरस्वती-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, ऐं वीजाय नमः षडारे—लिङ्गे, श्रीबाणा-शक्त्यै नमः दशारे—नाभौ, श्रीमातङ्गी महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे—मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, हास्य-रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः लिङ्ग-कर्मेन्द्रिये, सौम्य स्वराय नमः चेतसि, वायु-तत्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः कर-तले, श्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य सप्ताशीति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
एवमेतद् बली शुम्भो	मध्यमाभ्यां वषट्	शिखायै वषट्
निशुम्भश्चाति-वीर्य-वान्	अनामिकाभ्यां हुम्	कवचाय हुम्
किं करोमि प्रतिज्ञा मे	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
यदनालोचिता पुरा	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— अये मातर्लक्ष्मी त्वदरुण-पदाम्भोज-निकटे,
लुठन्तं बालं मामविरल-गलद्-बाष्प-जटिलम्।
सुधा-सेक-स्निग्धैरति-मसृण-मुग्धैः कर-तलैः,
समस्ता रत्नानि हत-विषय-शुम्भं जहि सदा।।

ॐ ऐं ऐं नमः एवमेतद् बली शुम्भो, निशुम्भश्चाति-वीर्य-वान्।
किं करोमि प्रतिज्ञा मे, यदनालोचिता पुरा नमो ऐं ऐं ॐ।।३८७।।

१००० जपात् सिद्धिः, घृत-पायस-तिलैर्होमः, पालाश समिधा।

* * *

३८८

विनियोगः—ॐ अस्य श्री **'स त्वं गच्छ मयोक्तं'** इति सप्तशती-चतुर्थ-शतकस्य अष्टाशीति-मन्त्रस्य श्रीमहा-सरस्वती ऋषिः, श्रीमहा-लक्ष्मी देवता, स्कीं बीजं, श्रीपाशिनी शक्तिः, श्रीमातङ्गी-महा-विद्या, रजो गुणः, रसना ज्ञानेन्द्रियं, हास्य रसः, लिङ्ग कर्मेन्द्रियं, सौम्य स्वरः, वायु तत्त्वं, शान्ति कला, श्रीं उत्कीलनं, आकर्षिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य अष्टाशीति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीमहा-सरस्वती-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, स्कीं बीजाय नमः षडारे—लिङ्गे, श्रीपाशिनी-शक्त्यै नमः दशारे —नाभौ, श्रीमातङ्गी-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे—मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, हास्य-रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः लिङ्ग-कर्मेन्द्रिये, सौम्य स्वराय नमः चेतसि, वायु-तत्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः कर-तले, श्रीं उत्कीलनाय नमः पादयोः, आकर्षिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य अष्टाशीति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं स्कीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
सं त्वं गच्छ मयोक्तं ते	मध्यमाभ्यां वषट्	शिखायै वषट्
यदेतत् सर्वमादृतः	अनामिकाभ्यां हुम्	कवचाय हुम्
तदाचक्ष्वासुरेन्द्राय	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
स च युक्तं करोतु तत्	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अये मातर्लक्ष्मी त्वदरुण-पदाम्भोज-निकटे,**
लुठन्तं बालं मामविरल-गलद्-वाष्प-जटिलम्।
सुधा-सेक-स्निग्धैरति-मसृण-मुग्धैः कर-तलैः,
समस्ता रत्नानि हत-विषय-शुम्भं जहि सदा।।

ॐ ऐं स्कीं नमः स त्वं गच्छ मयोक्तं ते, यदेतत् सर्वमादृतः।
तदाचक्ष्वासुरेन्द्राय, स च युक्तं करोतु तत् नमो स्कीं ऐं ॐ।।३८८।।

१००० जपात् सिद्धिः, तिल-मांस-घृतैर्होमः, पालाश समिधा।

* * *

इति श्रीमार्कण्डेय-पुराणे सावर्णिके मन्वन्तरे देवी-माहात्म्ये देव्या दूत-सम्वादो नाम पञ्चमोऽध्यायः।।५।।
श्लोकाः ७६, उवाच-मन्त्राः ९, एवमादितो ३८८।।

ॐ ह्रीं श्रीसरस्वत्यै नमः। श्रीगणेशाय नमः। श्री आदि-नाथाय नमः।

तृतीय चरित (शुम्भ-निशुम्भ-वधः)

षष्ठ अध्याय

३८६

विनियोगः— ॐ अस्य श्री **'ऋषिरुवाच'** इति सप्तशती-चतुर्थ-शतकस्य नवाशीति-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहासरस्वती देवता, श्रौं बीजं, श्रीवादिनी शक्तिः, श्रीभैरवी महाविद्या, सतो गुणः, श्रोत्र ज्ञानेन्द्रियं, वीर रसः, कर कर्मेन्द्रियं, तीव्र स्वरः, भू तत्त्वं, निवृत्ति कला, ऐं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य नवाशीति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीवेदव्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, श्रौं बीजाय नमः षडारे—लिङ्गे, श्रीवादिनी-शक्त्यै नमः दशारे—नाभौ, श्रीभैरवी महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे—मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, भू-तत्वाय नमः चतुरारे—गुदे, निवृत्ति-कलायै नमः कर-तले, ऐं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य नवाशीति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	षडङ्ग-न्यासः
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
श्रौं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं श्रौं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
ऋषिरुवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्।।
गौरी - देह - समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि - दैत्यार्दिनीम्।।

ॐ ऐं श्रौं नमः **ऋषिरुवाच** **नमो श्रौं ऐं ॐ।।३८६।।**

१००० जपात् सिद्धिः मांस-युत-हव्यैर्होमः

* * *

३६०

विनियोगः—ॐ अस्य श्री **'इत्याकर्ण्य वचो देव्याः'** इति सप्तशती-चतुर्थ-शतकस्य नवति-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-लक्ष्मी देवता, ॐ वीजं, श्रीवन्दिनी शक्तिः, श्रीकमला महा-विद्या, रजो गुणः, श्रोतृ ज्ञानेन्द्रियं, वीर रसः, कर कर्मेन्द्रियं, तीव्र स्वरः, जल तत्त्वं, प्रतिष्ठा कला, श्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्तचतुर्थ-शतकस्य नवति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, ॐ वीजाय नमः षडारे—लिङ्गे, श्रीवन्दिनी-शक्त्यै नमः दशारे—नाभौ, श्रीकमला महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे—मनसि, श्रोतृ-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः कर-तले, श्रीं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य नवति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ॐ	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
इत्याकर्ण्य वचो देव्याः	मध्यमाभ्यां वषट्	शिखायै वषट्
स दूतोऽमर्ष-पूरितः	अनामिकाभ्यां हुम्	कवचाय हुम्
समाचष्ट समागम्य	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
दैत्य-राजाय विस्तरात्	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **ब्रह्मा-योनि-रमा-सुरेश्वर-सुहल्लेखाभिरुक्तैस्तथा,**
मार्तण्डेन्दु - मनोज - हंस - वसुधा-मायाभिरुतं सितैः।
सोमाम्बु-क्षिति-शक्तिभिः प्रकटितैर्वाणाङ्ग-वेदैः,
क्रमात् वर्णैः श्रीहरि-सेवकेन विदितां विद्यां श्रियं भावये॥

ॐ ऐं ॐ नमः इत्याकर्ण्य वचो देव्याः, स दूतोऽमर्ष-पूरितः।
समाचष्ट समागम्य, दैत्य - राजाय विस्तरात् नमो ॐ ऐं ॐ॥३६०॥

१००० जपात् सिद्धिः, घृत-पायस, पालाश-बन्धूक-पुष्पादिभि र्होमः।

* * *

३९१

विनियोगः— ॐ अस्य श्री **'तस्य दूतस्य तद्-वाक्यं'** इति सप्तशती-चतुर्थ-शतकस्य एक-नवति मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहा-काली देवता, त्रूं बीजं, श्रीवज्र-रूपा शक्तिः, श्रीकाली-महा-विद्या, तमो-गुणः, श्रोतृ-ज्ञानेन्द्रियं, वीर-रसः, कर कर्मेन्द्रियं, तीव्र स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य एक-नवति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीवेद-व्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, त्रूं बीजाय नमः षडारे—लिङ्गे, श्रीवज्र-रूपा-शक्त्यै नमः दशारे —नाभौ, श्रीकाली-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, श्रोतृ-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, अग्नि-तत्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य एक-नवति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं त्रूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
तस्य दूतस्य तद्-वाक्यं	मध्यमाभ्यां वषट्	शिखायै वषट्
आकर्ण्याऽसुर-राट् ततः	अनामिकाभ्यां हुम्	कवचाय हुम्
स क्रोधः प्राह दैत्यानां	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
अधिपं धूम्र-लोचनं	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **आद्यैरग्नि-रवीन्दु-बिम्ब-निलयैरम्ब! त्रि-लिङ्गात्मभि-**

मिश्रा रक्तासित - प्रभैरनुपमैर्युष्मत् - पदैस्तैस्त्रिभिः।

स्वात्मोत्पादित-काल-लोक-निगमावस्थामरादि-त्रयै-

रुद्भूतं शिव-कालिकेति कलयेद् यस्ते स धन्यो नरः॥

ॐ ऐं त्रूं नमः तस्य दूतस्य तद्-वाक्यमाकर्ण्याऽसुर-राट् ततः।

स - क्रोधः प्राह दैत्यानामधिपं धूम्र - लोचनं नमो त्रूं ऐं ॐ॥३९१॥

१००० जपात् सिद्धिः, मांस-पायस-तिल-बन्धूक-पुष्पादिभिर्होमः।

* * *

३६२

विनियोगः— ॐ अस्य श्री **'हे धूम्र-लोचनाशु त्वं'** इति सप्तशती-चतुर्थ-शतकस्य द्वि-नवति-मन्त्रस्य श्रीशुम्भ ऋषिः, श्रीमहा-काली देवता, ह्रौं बीजं, श्रीशुचि-व्रता शक्तिः, श्रीतारा महा-विद्या, तमो गुणः, चक्षु ज्ञानेन्द्रियं, वीर रसः, पद कर्मेन्द्रियं, तीव्र स्वरः, वायु तत्त्वं, शान्ति कला, क्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य द्वि-नवति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्री शुम्भ-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, ह्रौं वीजाय नमः षडारे—लिङ्गे, श्रीशुचि-व्रता-शक्त्यै नमः दशारे —नाभौ, श्रीतारा-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे— मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, पद-कर्मेन्द्रियाय नमः पद-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य द्वि-नवति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ह्रौं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
हे धूम्र-लोचनाशु त्वं	मध्यमाभ्यां वषट्	शिखायै वषट्
स्व-सैन्य-परिवारितः	अनामिकाभ्यां हुम्	कवचाय हुम्
तामानय बलाद् दुष्टां	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
केशाकर्षण-विह्वलां	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **आधैरग्नि-रवीन्दु-बिम्ब-निलयैरम्ब! त्रि-लिङ्गात्मभि-**

मिश्रा रक्तासित - प्रभैरनुपमैर्युष्मत् - पदैस्तैस्त्रिभिः।

स्वात्मोत्पादित-काल-लोक-निगमावस्थामरादि-त्रयै-

रुद्भूतं शिव-कालिकेति कलयेद् यस्ते स धन्यो नरः॥

ॐ ऐं ह्रौं नमः हे धूम्र-लोचनाशु त्वं, स्व-सैन्य-परिवारितः।

तामानय बलाद् दुष्टां, केशाकर्षण-विह्वलां नमो ह्रौं ऐं ॐ॥३६२॥

१००० जपात् सिद्धिः, मांस-पायस-तिल-बन्धूक-पुष्पादिभिर्होमः।

* * *

३६३

विनियोगः— ॐ अस्य श्री **'तत्-परित्राणदः कश्चिद्'** इति सप्तशती-चतुर्थ-शतकस्य त्रि-नवति-मन्त्रस्य श्रीशुम्भ ऋषिः, श्री महा-लक्ष्मी देवता, क्रौं वीजं, श्रीवरदा शक्तिः, श्रीभुवनेश्वरी महा-विद्या, रजो गुणः, चक्षु ज्ञानेन्द्रियं, वीर रसः, कर कर्मेन्द्रियं, तीव्र स्वरः, जल तत्त्वं, प्रतिष्ठा कला, क्लीं श्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य त्रि-नवति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीशुम्भ-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे— हृदि, क्रौं वीजाय नमः षडारे— लिङ्गे, श्रीवरदा-शक्त्यै नमः दशारे— नाभौ, श्रीभुवनेश्वरी-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे—मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः कर-तले, क्लीं श्रीं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य त्रि-नवति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्रौं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
तत्-परित्राणदः कश्चिद्	मध्यमाभ्यां वषट्	शिखायै वषट्
यदि वोत्तिष्ठतेऽपरः	अनामिकाभ्यां हुम्	कवचाय हुम्
स हन्तव्योऽमरो वापि	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
यक्षो गन्धर्व एव वा	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **ब्रह्म-योनि-रमा-सुरेश्वर-सुहल्लेखाभिरुक्तैस्तथा,**

मार्तण्डेन्दु - मनोज - हंस - वसुधा-मायाभिरुतं सितैः।

सोमाम्बु-क्षिति-शक्तिभिः प्रकटितैर्वाणाङ्ग-वेदैः,

क्रमात् वर्णैः श्रीहरि-सेवकेन विदितां विद्यां श्रियं भावये॥

ॐ ऐं क्रौं नमः तत्-परित्राणदः कश्चिद्, यदि वोत्तिष्ठतेऽपरः।

स हन्तव्योऽमरो वापि, यक्षो गन्धर्व एव वा नमो क्रौं ऐं ॐ॥३६३॥

१००० जपात् सिद्धिः, घृत-पायस-पलाश-बन्धूक-पुष्पादिभिर्होम।

* * *

३६४

विनियोगः— ॐ अस्य श्री **'ऋषिरुवाच'** इति सप्तशती-चतुर्थ-शतकस्य चतुर्नवति-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्री महा-सरस्वती देवता, श्रौं वीजं, श्रीवागीशी शक्तिः, श्रीभैरवी महा-विद्या, सतो गुणः, चक्षु ज्ञानेन्द्रियं, वीर रसः, गुद कर्मेन्द्रियं, तीव्र स्वरः, भू तत्त्वं, निवृत्ति कला, ऐं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्धयर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्धयर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्तचतुर्थ-शतकस्य चतुर्नवति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीवेद-व्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, श्रौं वीजाय नमः षडारे—लिङ्गे, श्रीवागीशी-शक्त्यै नमः दशारे—नाभौ, श्रीभैरवी-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे—मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे—गुदे, निवृत्ति-कलायै नमः कर-तले, ऐं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्धयर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्धयर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य एक-नवति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
श्रौं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं श्रौं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
ऋषिरुवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य प्रभाम्॥
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि-दैत्यार्दिनीम्॥

ॐ ऐं श्रौं नमः ऋषिरुवाच नमो श्रौं ऐं ॐ॥३६४॥

१००० जपात् सिद्धिः, मांस-युत-हव्यैर्होमः।

* * *

३६५

विनियोगः— ॐ अस्य श्री **'तेनाज्ञप्तस्ततः शीघ्रं'** इति सप्तशती-चतुर्थ-शतकस्य पञ्च-नवति-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-सरस्वती देवता, त्रीं बीजं, श्रीविद्या शक्तिः, श्रीमातङ्गी महा-विद्या, सतो गुणः, श्रोतृ ज्ञानेन्द्रियं, वीर रसः, गुद कर्मेन्द्रियं, तीव्र स्वरः, जल तत्त्वं, प्रतिष्ठा कला, क्लीं श्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य पञ्च-नवति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, त्रीं बीजाय नमः षडारे—लिङ्गे, श्रीविद्या-शक्त्यै नमः दशारे—नाभौ, श्रीमातङ्गी-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे—मनसि, श्रोतृ-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः कर-तले, क्लीं श्रीं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य पञ्च-नवति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं त्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
तेनाज्ञप्तस्ततः शीघ्रं	मध्यमाभ्यां वषट्	शिखायै वषट्
स दैत्यो धूम्र-लोचनः	अनामिकाभ्यां हुम्	कवचाय हुम्
वृतः षष्ट्या सहस्राणां	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
असुराणां द्रुतं ययौ	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्॥
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि - दैत्यार्दिनीम्॥

ॐ ऐं त्रीं नमः तेनाज्ञप्तस्ततः शीघ्रं, स दैत्यो धूम्र-लोचनः।
वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ नमो त्रीं ऐं ॐ॥३६५॥

१००० जपात् सिद्धिः, मांस-पायस-तिल-बन्धूक-पुष्पादिभिर्होमः।

* * *

३६६

विनियोगः— ॐ अस्य श्री **'स दृष्ट्वा तां'** इति सप्तशती-चतुर्थ-शतकस्य षण्णवति-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहा-काली देवता, क्लीं बीजं, क्रीं शक्तिः, श्रीकाली महा-विद्या, तमो गुणः, घ्राण ज्ञानेन्द्रियं, वीर रसः, योनि कर्मेन्द्रियं, तीव्र स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य षण्णवति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीवेद-व्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, क्लीं बीजाय नमः षडारे—लिङ्गे, क्रीं शक्त्यै नमः दशारे —नाभौ, श्रीकाली-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, योनि-कर्मेन्द्रियाय नमः योनि-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य षण्णवति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्लीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
स दृष्ट्वा तां ततो देवीं	मध्यमाभ्यां वषट्	शिखायै वषट्
तुहिनाचल-संस्थितां	अनामिकाभ्यां हुम्	कवचाय हुम्
जगादोच्चैः प्रयाहीति	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
मूलं शुम्भ-निशुम्भयोः	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **तप्त-स्वर्ण-कृतोरु-कुण्डल-युगं माणिक्य-मुक्तोल्लसद्—**

हीरा - बद्धमनन्य - तुल्यमपरं हैमं च चक्र-द्वयम्।

शुक्राकार - निकार-दक्षमपरं मुक्ता-फलं सुन्दरम्,

विभ्रत् कर्ण-युगं स -कालि वरदा धूम्रादि-सम्मर्दिनीम्॥

ॐ ऐं क्लीं नमः स दृष्ट्वा तां ततो देवीं, तुहिनाचल-संस्थिताम्।

जगादोच्चैः प्रयाहीति, मूलं शुम्भ - निशुम्भयोः नमो क्लीं ऐं ॐ॥३६६॥

१००० जपात् सिद्धिः, मांस-घृत-तिल-बन्धूक-कुसुमैर्होमः।

* * *

३६७

विनियोगः— ॐ अस्य श्री **'न चेत् प्रीत्याऽद्य'** इति सप्तशती-चतुर्थ-शतकस्य सप्त-नवति-मन्त्रस्य श्रीधूम्र-लोचन ऋषिः, श्रीमहा-काली देवता, प्रीं वीजं, क्रीं शक्तिः, श्री ज्येष्ठा महा-विद्या, तमो गुणः, घ्राण ज्ञानेन्द्रियं, वीर रसः, योनि कर्मेन्द्रियं, तीव्र स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य सप्त-नवति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीधूम्र-लोचन-ऋषये नमः सहस्रारे— शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, प्रीं वीजाय नमः षडारे— लिङ्गे, क्रीं शक्त्यै नमः दशारे —नाभौ, श्रीज्येष्ठा- महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, योनि-कर्मेन्द्रियाय नमः योनि-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य सप्त-नवति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं प्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
न चेत् प्रीत्याऽद्य भवती	मध्यमाभ्यां वषट्	शिखायै वषट्
मद्-भर्त्तारमुपैष्यति	अनामिकाभ्यां हुम्	कवचाय हुम्
ततो बलान्नयाम्येष	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
केशाकर्षण-विह्वलां	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **तप्त-स्वर्ण-कृतोरु-कुण्डल-युगं माणिक्य-मुक्तोल्लसद्—**
हीरा - बद्धमनन्य - तुल्यमपरं हैमं च चक्र - द्वयम्।
शुक्राकार - निकार - दक्षमपरं मुक्ता-फलं सुन्दरम्,
विभ्रत् कर्ण-युगं स-कालि वरदा धूम्रादि-सम्मर्दिनीम्॥

ॐ ऐं प्रीं नमः न चेत् प्रीत्याऽद्य भवती, मद्-भर्त्तारमुपैष्यति।
ततो बलान्नयाम्येष, केशाकर्षण - विह्वलाम् नमो प्रीं ऐं ॐ॥३६७॥

१००० जपात् सिद्धिः, मांस-घृत-तिल-बन्धूक-कुसुमैर्होमः।

* * *

३६८

विनियोगः— ॐ अस्य श्री **'देव्युवाच'** इति सप्तशती-चतुर्थ-शतकस्य अष्ट-नवति-मन्त्रस्य श्रीमार्कण्डेय ऋषि, श्रीमहा-सरस्वती देवता, ह्रीं वीजं, ऐं शक्तिः, श्रीभैरवी महा-विद्या, सतो गुणः, घ्राण ज्ञानेन्द्रियं, वीर रसः, योनि कर्मेन्द्रियं, तीव्र स्वरः, अग्नि तत्त्वं, विद्या कला, ऐं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्तचतुर्थ-शतकस्य अष्ट-नवति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीमार्कण्डेय-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, ह्रीं बीजाय नमः षडारे— लिङ्गे, ऐं शक्त्यै नमः दशारे—नाभौ, श्रीभैरवी-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे—मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, योनि-कर्मेन्द्रियाय नमः योनि-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, ऐं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य अष्ट-नवति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमो	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ह्रीं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं ह्रीं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
देव्युवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्।।
गौरी - देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि-दैत्यार्दिनीम्।।

ॐ ऐं ह्रीं नमः **देव्युवाच** **नमो ह्रीं ऐं ॐ।।३६८।।**

१००० जपात् सिद्धिः, मांस-घृत-तिल-बन्धूक-कुसुमैर्होमः।

* * *

३६६

विनियोगः— ॐ अस्य श्री **'दैत्येश्वरेण प्रहितो'** इति सप्तशती-चतुर्थ-शतकस्य नव-नवति-मन्त्रस्य श्रीमहा-सरस्वती ऋषिः, श्रीमहा-सरस्वती देवता, ह्रौं वीजं, क्लीं शक्तिः, श्रीसुन्दरी महा-विद्या, सतो गुणः, त्वक् ज्ञानेन्द्रियं, वीर रसः, कर कर्मेन्द्रियं, तीव्र स्वरः, जल तत्वं, प्रतिष्ठा कला, ऐं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य नव-नवति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमहा-सरस्वती-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, ह्रौं बीजाय नमः षडारे—लिङ्गे, क्लीं शक्त्यै नमः दशारे—नाभौ, श्रीसुन्दरी-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे—मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः करतले, ऐं उत्कीलनाय नमः पादयो, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य नव-नवति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ह्रौं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
दैत्येश्वरेण प्रहितो	मध्यमाभ्यां वषट्	शिखायै वषट्
बल-वान् बल-सम्वृतः	अनामिकाभ्यां हुम्	कवचाय हुम्
बलान्नयसि मामेवं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
ततः किं ते करोम्यहं	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **सरस्वतीं नमस्यामि चेतनां हृदि संस्थिताम्।**
कण्ठस्थां कल-भाषां च ऐङ्कारां ह्रीं-फल-प्रदाम्॥

ॐ ऐं ह्रौं नमः दैत्येश्वरेण प्रहितो, बल-वान् बल-सम्वृतः।
बलान्नयसि मामेवं, ततः किं ते करोम्यहम् नमो ह्रौं ऐं ॐ॥३६६॥

१००० जपात् सिद्धिः, पायस-मांस-तिलैर्होमः।

* * *

४००

विनियोगः— ॐ अस्य श्री **'ऋषिरुवाच'** इति सप्तशती-चतुश्शत-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहा-सरस्वती देवता, श्रौं वीजं, क्लीं शक्तिः, श्रीभैरवी महा-विद्या, सतो गुणः, त्वक् ज्ञानेन्द्रियं, वीर रसः, कर कर्मेन्द्रियं, तीव्र स्वरः, भू तत्त्वं, विद्या कला, क्लीं श्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य चतुश्शत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीवेद-व्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, श्रौं बीजाय नमः षडारे—लिङ्गे, क्लीं शक्त्यै नमः दशारे—नाभौ, श्रीभैरवी-महा-विद्यायै नमः षोडशारे— कण्ठे, सतो-गुणाय नमः अन्तरारे— मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः करतले, क्लीं श्रीं उत्कीलनाय नमः पादयो, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-चतुर्थ-शतकस्य चतुश्शत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यास	**षडङ्ग-न्यासः**
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
श्रौं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं श्रौं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
ऋषिरुवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य प्रभाम्।।
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि-दैत्यार्दिनीम्।।

ॐ ऐं श्रौं नमः ऋषिरुवाच नमो श्रौं ऐं ॐ।।४००।।

१००० जपात् सिद्धिः, मांस-युत-हव्यैर्होमः।

* * *

४०१

विनियोगः— ॐ अस्य श्री **'इत्युक्तः सोऽभ्यधावत्'** इति सप्तशती-पञ्चम-शतकस्य प्रथम-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा - लक्ष्मी देवता, ऐं बीजं, श्री शक्तिः, श्रीछिन्नमस्ता महा - विद्या, रजो गुणः, त्वक् ज्ञानेन्द्रियं, वीर रसः, वाक् कर्मेन्द्रियं, तीव्र स्वरः, अग्नि तत्त्वं, विद्या कला, ह्रीं क्लीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चम-शतकस्य प्रथम-मन्त्र जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, ऐं बीजाय नमः षडारे—लिङ्गे, श्री-शक्त्यै नमः दशारे—नाभौ, श्रीछिन्नमस्ता-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे—मनसि, त्वक्-ज्ञानेन्द्रियाय नमः कण्ठ-ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, तीव्र-स्वराय नमः मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, ह्रीं क्लीं उत्कीलनाय नमः पादयोः क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चम-शतकस्य प्रथम-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	षडङ्ग-न्यासः
ॐ ऐं अरैं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
इत्युक्तः सोऽभ्यधावत् तां	मध्यमाभ्यां वषट्	शिखायै वषट्
असुरो धूम्र-लोचनः	अनामिकाभ्यां हुम्	कवचाय हुम्
हुङ्कारेणैव तं भस्म	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सा चकाराम्बिका ततः	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **पाशं प्रपूरित-महा-सुमति-प्रकाशो, यो वा तव त्रिपुर-सुन्दरि सुन्दरीणाम्।**
आकर्षणोऽखिल-वशीकरणे प्रवीणा, हुङ्कार-धार-प्रलयं गतो धूम्र-चक्षुः॥

ॐ ऐं ऐं नमः **इत्युक्तः सोऽभ्यधावत् तामसुरो धूम्र-लोचनः।**
हुङ्कारेणैव तं भस्म, सा चकाराम्बिका ततः **नमो ऐं ऐं ॐ॥४०१॥**

१००० जपात् सिद्धिः, मांस-रक्त-पलाश-तिलैर्होमः।

* * *

४०२

विनियोगः— ॐ अस्य श्री **'अथ क्रुद्धं महा-सैन्यं'** इति सप्तशती-पञ्चम-शतकस्य द्वितीय-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहाकाली देवता, औं वीजं, श्रीपुष्टि शक्तिः, श्रीपीताम्बरा महा-विद्या, तमो गुणः, त्वक् ज्ञानेन्द्रियं, वीर रसः, वाक् कर्मेन्द्रियं, तीव्र स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चम-शतकस्य द्वितीय-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, औं वीजाय नमः षडारे —लिङ्गे, श्रीपुष्टि-शक्त्यै नमः दशारे—नाभौ, श्रीपीताम्बरा-महा-विद्यायै नमः षोडशारे— कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, वीर-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चम-शतकस्य द्वितीय-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं औं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
अथ क्रुद्धं महा-सैन्यं	मध्यमाभ्यां वषट्	शिखायै वषट्
असुराणां तथाऽम्बिका	अनामिकाभ्यां हुम्	कवचाय हुम्
ववर्ष सायकैस्तीक्ष्णैः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
तथा शक्ति-परश्वधैः	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अथ तव धनुः पुण्ड्रेक्षुत्वात् प्रसिद्धमति-द्युति-**
त्रिभुवन - वधूमुखज्योत्स्ना कला - निधि-मण्डलम्।
सकल - जननि स्मारं स्मारं गतः स्मरताम्,
नरस्त्रिभुवन-वधू मोहाम्भोधेः जघान च तद्-बलम्॥

ॐ ऐं औं नमः अथ क्रुद्धं महा-सैन्यमसुराणां तथाऽम्बिका।
ववर्ष सायकैस्तीक्ष्णैः तथा शक्ति-परश्वधैः नमो औं ऐं ॐ॥४०२॥

१००० जपात् सिद्धिः, मांस-रक्त-पलाश-तिलैर्होमः।

* * *

४०३

विनियोगः— ॐ अस्य श्री **'ततो धुत-सटः कोपात्'** इति सप्तशती-पञ्चम-शतकस्य तृतीय-मन्त्रस्य श्रीमार्कण्डेय ऋषिः, श्रीमहाकाली देवता, श्रीं बीजं, श्रीप्रज्ञा शक्तिः, श्रीपीताम्बरा महा-विद्या, तमो गुणः, रसना ज्ञानेन्द्रियं, रौद्र रसः, वाक् कर्मेन्द्रियं, तीव्र स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चम-शतकस्य तृतीय-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः—श्रीमार्कण्डेय-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, श्रीं बीजाय नमः षडारे —लिङ्गे, श्रीप्रज्ञा-शक्त्यै नमः दशारे—नाभौ, श्रीपीताम्बरा-महा-विद्यायै नमः षोडशारे— कण्ठे, तमो-गुणाय नमः अन्तरारे—मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, रौद्र-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, तीव्र-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, क्षोभिणी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चम-शतकस्य तृतीय-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं श्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ततो धुत-सटः कोपात्	मध्यमाभ्यां वषट्	शिखायै वषट्
कृत्वा नादं सु-भैरवं	अनामिकाभ्यां हुम्	कवचाय हुम्
पपाताऽसुर-सेनायां	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सिंहो देव्याः स्व-वाहनः	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— अथ तव धनुः पुण्ड्रेक्षुत्वात् प्रसिद्धमति-द्युति-
त्रिभुवन - वधूमुग्धज्योत्स्ना कला - निधि-मण्डलम्।
सकल - जननि स्मारं स्मारं गतः स्मरताम्,
नरस्त्रिभुवन-वधू मोहाम्भोधेः जघान च तद्-बलम्।।

ॐ ऐं श्रीं नमः ततो धुत-सटः कोपात्, कृत्वा नादं सु-भैरवम्।
पपाताऽसुर-सेनायां, सिंहो देव्याः स्व - वाहनः नमो श्रीं ऐं ॐ।।४०३।।

१००० जपात् सिद्धिः, मांस-रक्त-पलाश-तिलैर्होमः।

* * *

४०४

विनियोगः— ॐ अस्य श्री **'कांश्चित् कर-प्रहारेण'** इति सप्तशती-पञ्चम-शतकस्य चतुर्थ-मन्त्रस्य श्री वाजसनेय ऋषिः, श्रीमहाकाली देवता, क्रां वीजं, श्रीसिनीवाली शक्तिः, श्रीपीताम्बरा-महा-विद्या, तमो गुणः, रसना ज्ञानेन्द्रियं, रौद्र रसः, लिङ्ग कर्मेन्द्रियं, तीव्र स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, क्षोभिणी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-पञ्चम-शतकस्य चतुर्थ-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमहा-सरस्वती-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-महालक्ष्मी-महासरस्वती-देवताभ्यो नमः द्वादशारे—हृदि, क्लीं बीजाय नमः षडारे—लिङ्गे, श्रीचतुष्षष्टि-योगिन्यो-नव-शक्तयश्च-शक्तिभ्यो नमः दशारे—नाभौ, श्रीकाल्यादि-दश-महा-विद्याभ्यो नमः षोडशारे—कण्ठे, सत्-रजो-तमाः-त्रिगुणेभ्यो नमः अन्तरारे—मनसि, पञ्च-ज्ञानेन्द्रियेभ्यो नमः ज्ञानेन्द्रिये, नव-रसाय नमः चेतसि, पञ्च-कर्मेन्द्रियेभ्यो नमः कर्मेन्द्रिये, आशिष-स्वराय नमः कण्ठ-मूले, पञ्च-तत्त्वानि-तत्त्वेभ्यो नमः चतुरारे—गुदे, पञ्च-कलाभ्यो नमः कर-तले, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनाय नमः पादयोः, आशिष-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त -सप्तम-शतकस्य पञ्च-पञ्चाशन्मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्लीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ब्रह्मणा च कृतास्तास्तु	मध्यमाभ्यां वषट्	शिखायै वषट्
प्रयच्छन्ति शुभां मतिम्	अनामिकाभ्यां हुम्	कवचाय हुम्
अरण्ये प्रान्तरे वापि	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
दावाग्नि-परि-वारितः	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं—**एकैकं तव देवि! जन्म ह्यनघं स-व्यंजना व्यंजनम्,**
कूटस्थं यदि वा पृथक् क्रम-गतं यद्वा स्थितं व्युत्क्रमात्।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली-करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं क्लीं नमः ब्रह्मणा च कृतास्तास्तु, प्रयच्छन्ति शुभां मतिम्।
अरण्ये प्रान्तरे वापि, दावाग्नि-परि-वारितः नमो क्लीं ऐं ॐ॥६५५॥

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६५६

विनियोगः— ॐ अस्य श्री **'दस्युभिर्वा वृतः शून्ये'** इति सप्तशती-सप्तम-शतकस्य षट्-पञ्चाशन्मन्त्रस्य श्रीमहा-सरस्वती ऋषिः, श्रीमहाकाली-महालक्ष्मी-महासरस्वतीः देवताः, स्लूं बीजं, श्रीचतुष्षष्टि-योगिन्यो नव-शक्तयश्च शक्तयः, श्रीकाल्यादि-दश-महा-विद्याः, सत्-रजो-तमाः त्रिगुणाः, पञ्च ज्ञानेन्द्रियाणि, नव रसाः, पञ्च कर्मेन्द्रियाणि, आशिष स्वरः, पञ्च-तत्वानि तत्त्वं, पञ्च कलाः, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनं, आशिष मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य षट्-पञ्चाशन्मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमहा-सरस्वती-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-महालक्ष्मी-महासरस्वती-देवताभ्यो नमः द्वादशारे—हृदि, स्लूं बीजाय नमः षडारे—लिङ्गे, श्रीचतुष्षष्टि-योगिन्यो-नव-शक्तयश्च-शक्तिभ्यो नमः दशारे—नाभौ, श्रीकाल्यादि-दश-महा-विद्याभ्यो नमः षोडशारे—कण्ठे, सत्-रजो-तमाः-त्रिगुणेभ्यो नमः अन्तरारे—मनसि, पञ्च-ज्ञानेन्द्रियेभ्यों नमः ज्ञानेन्द्रिये, नव-रसाय नमः चेतसि, पञ्च-कर्मेन्द्रियेभ्यो नमः कर्मेन्द्रिये, आशिष-स्वराय नमः कण्ठ-मूले, पञ्च-तत्त्वानि-तत्त्वेभ्यो नमः चतुरारे—गुदे, पञ्च-कलाभ्यो नमः कर-तले, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनाय नमः पादयोः, आशिष-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त -सप्तम-शतकस्य षट्-पञ्चाशन्मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं स्लूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
दस्युभिर्वा वृतः शून्ये	मध्यमाभ्यां वषट्	शिखायै वषट्
गृहीतो वापि शत्रुभिः	अनामिकाभ्यां हुम्	कवचाय हुम्
सिंह-व्याघ्रानु-यातो वा	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
वने वा वन-हस्तिभिः	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं—**एकैकं तव देवि! जन्म ह्यनघं स-व्यंजना व्यंजनम्,**
कूटस्थं यदि वा पृथक् क्रम-गतं यद्वा स्थितं व्युत्क्रमात्।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली-करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं स्लूं नमः दस्युभिर्वा वृतः शून्ये, गृहीतो वापि शत्रुभिः।
सिंह-व्याघ्रानु-यातो वा, वने वा वन-हस्तिभिः नमो स्लूं ऐं ॐ॥ ६५६॥

१००० जपात् सिद्धिः घृत-हव्येन होमः।

***

६५७

विनियोगः— ॐ अस्य श्री **'राज्ञा क्रुद्धेन चाज्ञप्तो'** इति सप्तशती - सप्तम - शतकस्य सप्त - पञ्चाशन्मन्त्रस्य श्रीमहा - सरस्वती ऋषिः, श्रीमहाकाली - महालक्ष्मी - महासरस्वतीः देवताः, ह्रीं बीजं, श्रीचतुष्षष्टि - योगिन्यो नव - शक्तयश्च शक्तयः, श्रीकाल्यादि - दश - महा - विद्याः, सत् - रजो - तमाः त्रिगुणाः, पञ्च ज्ञानेन्द्रियाणि, नव रसाः, पञ्च कर्मेन्द्रियाणि, आशिष स्वरः, पञ्च - तत्वानि, पञ्च कलाः, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनं, आशिष मुद्रा, मम क्षेम - स्थैर्यायुरारोग्याभि - वृद्ध्यर्थं श्रीजगदम्बा - योगमाया - भगवती - दुर्गा - प्रसाद - सिद्ध्यर्थं च नमो - युत - प्रणव - वाग्वीज - स्व - वीज - लोम - विलोम - पुटितोक्त - सप्तम - शतकस्य सप्त - पञ्चाशन्मन्त्र - जपे विनियोगः।

ऋष्यादि - न्यासः— श्रीमहा - सरस्वती - ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली - महालक्ष्मी - महासरस्वती - देवताभ्यो नमः द्वादशारे—हृदि, ह्रीं बीजाय नमः षडारे—लिङ्गे, श्रीचतुष्षष्टि - योगिन्यो - नव - शक्तयश्च - शक्तिभ्यो नमः दशारे—नाभौ, श्रीकाल्यादि - दश - महा - विद्याभ्यो नमः षोडशारे—कण्ठे, सत् - रजो - तमाः - त्रिगुणेभ्यो नमः अन्तरारे—मनसि, पञ्च - ज्ञानेन्द्रियेभ्यो नमः ज्ञानेन्द्रिये, नव - रसाय नमः चेतसि, पञ्च - कर्मेन्द्रियेभ्यो नमः कर्मेन्द्रिये, आशिष - स्वराय नमः कण्ठ - मूले, पञ्च - तत्त्वानि - तत्त्वेभ्यो नमः चतुरारे—गुदे, पञ्च - कलाभ्यो नमः कर - तले, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनाय नमः पादयोः, आशिष - मुद्रायै नमः सर्वाङ्गे, मम क्षेम - स्थैर्यायुरारोग्याभि - वृद्ध्यर्थं श्रीजगदम्बा - योगमाया - भगवती - दुर्गा - प्रसाद - सिद्ध्यर्थं च नमो - युत - प्रणव - वाग्वीज - स्व - वीज - लोम - विलोम - पुटितोक्त - सप्तम - शतकस्य सप्त - पञ्चाशन्मन्त्र - जपे विनियोगाय नमः अञ्जलौ।

	कर - न्यासः	**षडङ्ग - न्यासः**
ॐ ऐं ह्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
राज्ञा क्रुद्धेन चाज्ञप्तो	मध्यमाभ्यां वषट्	शिखायै वषट्
वध्यो बन्ध - गतोऽपि वा	अनामिकाभ्यां हुम्	कवचाय हुम्
आघूर्णितो वा वातेन	कनिष्ठिकाभ्यां वौषट्	नेत्र - त्रयाय वौषट्
स्थितः पोते महार्णवे	करतल - कर - पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **एकैकं तव देवि! जन्म ह्यनघं स - व्यंजना व्यंजनम्,**
कूटस्थं यदि वा पृथक् क्रम - गतं यद्वा स्थितं व्युत्क्रमात्।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली - करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं ह्रीं नमः राज्ञा क्रुद्धेन चाज्ञप्तो, वध्यो बन्ध - गतोऽपि वा।
आघूर्णितो वा वातेन, स्थितः पोते महार्णवे नमो ह्रीं ऐं ॐ॥ ६५७॥

१००० जपात् सिद्धिः, घृतादि - हव्येन होमः।

***

६५८

विनियोगः— ॐ अस्य श्री **'पतत्सु चापि शस्त्रेषु'** इति सप्तशती-सप्तम-शतकस्य अष्ट-पञ्चाशन्मन्त्रस्य श्रीमहा-सरस्वती ऋषिः, श्रीमहाकाली-महालक्ष्मी-महासरस्वतीः देवताः, क्लीं बीजं, श्रीचतुष्षष्टि-योगिन्यो नव-शक्तयश्च शक्तयः, श्रीकाल्यादि-दश-महा-विद्याः, सत्-रजो-तमाः त्रिगुणाः, पञ्च ज्ञानेन्द्रियाणि, नव रसाः, पञ्च कर्मेन्द्रियाणि, आशिष स्वरः, पञ्च-तत्वानि तत्त्वं, पञ्च कलाः, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनं, आशिष मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य अष्ट-पञ्चाशन्मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमहा-सरस्वती-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-महालक्ष्मी-महासरस्वती-देवताभ्यो नमः द्वादशारे—हृदि, क्लीं बीजाय नमः षडारे—लिङ्गे, श्रीचतुष्षष्टि-योगिन्यो-नव-शक्तयश्च-शक्तिभ्यो नमः दशारे—नाभौ, श्रीकाल्यादि-दश-महा-विद्याभ्यो नमः षोडशारे—कण्ठे, सत्-रजो-तमाः-त्रिगुणेभ्यो नमः अन्तरारे—मनसि, पञ्च-ज्ञानेन्द्रियेभ्यो नमः ज्ञानेन्द्रिये, नव-रसाय नमः चेतसि, पञ्च-कर्मेन्द्रियेभ्यो नमः कर्मेन्द्रिये, आशिष-स्वराय नमः कण्ठ-मूले, पञ्च-तत्त्वानि-तत्त्वेभ्यो नमः चतुरारे—गुदे, पञ्च-कलाभ्यो नमः कर-तले, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनाय नमः पादयोः, आशिष-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त -सप्तम-शतकस्य अष्ट-पञ्चाशन्मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्लीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
पतत्सु चापि शस्त्रेषु	मध्यमाभ्यां वषट्	शिखायै वषट्
संग्रामे भृश-दारुणे	अनामिकाभ्यां हुम्	कवचाय हुम्
सर्वा-बाधासु घोरासु	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
वेदनाऽभ्यर्दितोऽपि वा	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं—**एकैकं तव देवि! जन्म ह्यनघं स-व्यंजना व्यंजनम्,**
कूटस्थं यदि वा पृथक् क्रम-गतं यद्वा स्थितं व्युत्क्रमात्।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली-करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं क्लीं नमः पतत्सु चापि शस्त्रेषु, संग्रामे भृश-दारुणे।
सर्वा-बाधासु घोरासु, वेदनाऽभ्यर्दितोऽपि वा नमो क्लीं ऐं ॐ॥ ६५८॥

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६५६

विनियोगः— ॐ अस्य श्री **'स्मरन् ममैतच्चरितं'** इति सप्तशती - सप्तम - शतकस्य एकोन - षष्टि - मन्त्रस्य श्रीमहा - सरस्वती ऋषिः, श्रीमहाकाली - महालक्ष्मी - महासरस्वतीः देवताः, ओं बीजं, श्रीचतुष्षष्टि - योगिन्यो नव - शक्तयश्च शक्तयः, श्रीकाल्यादि - दश - महा - विद्याः, सत् - रजो - तमाः त्रिगुणाः, पञ्च ज्ञानेन्द्रियाणि, नव रसाः, पञ्च कर्मेन्द्रियाणि, आशिष स्वरः, पञ्च - तत्वानि तत्त्वं, पञ्च कलाः, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनं, आशिष मुद्रा, मम क्षेम - स्थैर्यायुरारोग्याभि - वृद्ध्यर्थं श्रीजगदम्बा - योगमाया - भगवती - दुर्गा - प्रसाद - सिद्ध्यर्थं च नमो - युत - प्रणव - वाग्वीज - स्व - वीज - लोम - विलोम - पुटितोक्त - सप्तम - शतकस्य एकोन - षष्टि - मन्त्र - जपे विनियोगः ।

ऋष्यादि - न्यासः— श्रीमहा - सरस्वती - ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली - महालक्ष्मी - महासरस्वती - देवताभ्यो नमः द्वादशारे—हृदि, ओं वीजाय नमः षडारे—लिङ्गे, श्रीचतुष्षष्टि - योगिन्यो - नव - शक्तयश्च - शक्तिभ्यो नमः दशारे—नाभौ, श्रीकाल्यादि - दश - महा - विद्याभ्यो नमः षोडशारे—कण्ठे, सत् - रजो - तमाः - त्रिगुणेभ्यो नमः अन्तरारे—मनसि, पञ्च - ज्ञानेन्द्रियेभ्यो नमः ज्ञानेन्द्रिये, नव - रसाय नमः चेतसि, पञ्च - कर्मेन्द्रियेभ्यो नमः कर्मेन्द्रिये, आशिष - स्वराय नमः कण्ठ - मूले, पञ्च - तत्त्वानि - तत्त्वेभ्यो नमः चतुरारे—गुदे, पञ्च - कलाभ्यो नमः कर - तले, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनाय नमः पादयोः, आशिष - मुद्रायै नमः सर्वाङ्गे, मम क्षेम - स्थैर्यायुरारोग्याभि - वृद्ध्यर्थं श्रीजगदम्बा - योगमाया - भगवती - दुर्गा - प्रसाद - सिद्ध्यर्थं च नमो - युत - प्रणव - वाग्वीज - स्व - वीज - लोम - विलोम - पुटितोक्त - सप्तम - शतकस्य एकोन - षष्टि - मन्त्र - जपे विनियोगाय नमः अञ्जलौ ।

	कर - न्यासः	**षडङ्ग - न्यासः**
ॐ ऐं ओं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
स्मरन् ममैतच्चरितं	मध्यमाभ्यां वषट्	शिखायै वषट्
नरो मुच्येत सङ्कटात्	अनामिकाभ्यां हुम्	कवचाय हुम्
मम प्रभावात् सिंहाद्याः	कनिष्ठिकाभ्यां वौषट्	नेत्र - त्रयाय वौषट्
दस्यवो वैरिणस्तथा	करतल - कर - पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **एकैकं तव देवि! जन्म ह्यनघं स - व्यंजना व्यंजनम्,**
कूटस्थं यदि वा पृथक् क्रम - गतं यद्वा स्थितं व्युत्क्रमात् ।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली - करोति तरसा तं तं समस्तं नृणाम् ॥

ॐ ऐं ओं नमः स्मरन् ममैतच्चरितं, नरो मुच्येत सङ्कटात् ।
मम प्रभावात् सिंहाद्या, दस्यवो वैरिणस्तथा नमो ओं ऐं ॐ ॥ ६५६ ॥

१००० जपात् सिद्धिः, घृत - हव्येन होमः ।

***

६६०

विनियोगः— ॐ अस्य श्री **'दूरादेव पलायन्ते'** इति सप्तशती-सप्तम-शतकस्य षष्टि-मन्त्रस्य श्रीमहा-सरस्वती ऋषिः, श्रीमहाकाली-महालक्ष्मी-महासरस्वतीः देवताः, त्रों बीजं, श्रीचतुष्षष्टि-योगिन्यो नव-शक्तयश्च शक्तयः, श्रीकाल्यादि-दश-महा-विद्याः, सत्-रजो-तमाः त्रिगुणाः, पञ्च ज्ञानेन्द्रियाणि, नव रसाः, पञ्च कर्मेन्द्रियाणि, आशिष स्वरः, पञ्च-तत्वानितत्त्वं, पञ्च कलाः, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनं, आशिष मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं तत्त्वं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य षष्टि-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमहा-सरस्वती-ऋषये नमः सहस्रारे—शिरसि, श्रीमहाकाली-महालक्ष्मी-महासरस्वती-देवताभ्यो नमः द्वादशारे—हृदि, त्रों बीजाय नमः षडारे—लिङ्गे, श्रीचतुष्षष्टि-योगिन्यो-नव-शक्तयश्च-शक्तिभ्यो नमः दशारे—नाभौ, श्रीकाल्यादि-दश-महा-विद्याभ्यो नमः षोडशारे—कण्ठे, सत्-रजो-तमाः-त्रिगुणेभ्यो नमः अन्तरारे—मनसि, पञ्च-ज्ञानेन्द्रियेभ्यो नमः ज्ञानेन्द्रिये, नव-रसाय नमः चेतसि, पञ्च-कर्मेन्द्रियेभ्यो नमः कर्मेन्द्रिये, आशिष-स्वराय नमः कण्ठ-मूले, पञ्च-तत्त्वानि-तत्त्वेभ्यो नमः चतुरारे—गुदे, पञ्च-कलाभ्यो नमः कर-तले, ऐं ह्रीं क्लीं श्रीं क्रीं उत्कीलनाय नमः पादयोः, आशिष-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य षष्टि-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमो	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
त्रों नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं त्रों नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
दूरादेव पलायन्ते	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
स्मरतश्चरितं मम	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं—**एकैकं तव देवि! जन्म ह्यनघं स-व्यंजना व्यंजनम्,**
कूटस्थं यदि वा पृथक् क्रम-गतं यद्वा स्थितं व्युत्क्रमात्।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली-करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं त्रों नमः दूरादेव पलायन्ते, स्मरतश्चरितं मम नमो त्रों ऐं ॐ॥ ६६०॥

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६६१

विनियोगः— ॐ अस्य श्री **'ऋषिरुवाच'** इति सप्तशती-सप्तम-शतकस्य एक-षष्टि-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहा-सरस्वती देवता, श्रौं बीजं, श्रीत्राणकरी शक्तिः, श्रीतारा महा-विद्याः, सतो गुणः, श्रोतृ ज्ञानेन्द्रियं, शान्त रसः, कर कर्मेन्द्रियं, सौम्य स्वरः, भू तत्त्वं, निवृत्ति कला, ह्रीं उत्कीलनं, ताड़िनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य एक-षष्टि-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीवेद-व्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, श्रौं बीजाय नमः षडारे—लिङ्गे, श्रीत्राणकरी-शक्त्यै नमः दशारे—नाभौ, श्रीतारा-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे-मनसि, श्रोतृ-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे—गुदे, निवृत्ति-कलायै नमः कर-तले, ह्रीं उत्कीलनाय नमः पादयोः, ताड़िनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य एक-षष्टि-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमोः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
श्रौं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं श्रौं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
ऋषिरुवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्॥
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि-दैत्यार्दिनीम्॥

ॐ ऐं श्रौं नमः **ऋषिरुवाच** **नमो श्रौं ऐं ॐ ॥६६१॥**

१००० जपात् सिद्धिः, तिल-घृतादि-हव्येन होमः।

***

६६२

विनियोगः— ॐ अस्य श्री **'इत्युक्त्वा सा भगवती'** इति सप्तशती-सप्तम-शतकस्य द्वा-षष्टि-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-सरस्वती देवता, ऐं बीजं, श्री अन्तर्गोप्त्री शक्तिः, श्रीतारा महा-विद्याः, सतो गुणः, चक्षु ज्ञानेन्द्रियं, शान्त रसः, कर कर्मेन्द्रियं, सौम्य स्वरः, वायु तत्त्वं, शान्ति कला, ऐं ह्रीं उत्कीलनं, गोपिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्धयर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्धयर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य द्वा-षष्टि-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, ऐं बीजाय नमः षडारे—लिङ्गे, श्री अन्तर्गोप्त्री-शक्त्यै नमः दशारे—नाभौ, श्रीतारा-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे-मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः कर-तले, ऐं ह्रीं उत्कीलनाय नमः पादयोः, गोपिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्धयर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्धयर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य द्वा-षष्टि-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ ऐं	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ॐ नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं ऐं नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
इत्युक्तवा सा भगवती	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
चण्डिका चण्ड-विक्रमा	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **एकैकं तव देवि! जन्म ह्यनघं स-व्यंजना व्यंजनम्,**

कूटस्थं यदि वा पृथक् क्रम-गतं यद्वा स्थितं व्युत्क्रमात्।

यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,

जप्तं वा सफली-करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं ऐं नमः इत्युक्त्वा सा भगवती, चण्डिका चण्ड-विक्रमा नमो ऐं ऐं ॐ॥६६२॥

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६६३

विनियोगः— ॐ अस्य श्री **'पश्यतामेव देवानां'** इति सप्तशती - सप्तम - शतकस्य त्रयषष्टि - मन्त्रस्य श्रीमार्कण्डेय ऋषिः, श्रीमहा - सरस्वती देवता, प्रें बीजं, श्री अन्तर्गोप्त्री शक्तिः, श्रीतारा महा - विद्याः, सतो गुणः, त्वक् ज्ञानेन्द्रियं, शान्त रसः, लिङ्ग कर्मेन्द्रियं, सौम्य स्वरः, आकाश - तत्त्वं, परा - शान्ति कला, ह्रौं ॐ ऐं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम - स्थैर्यायुरारोग्याभि - वृद्ध्यर्थं श्रीजगदम्बा - योगमाया - भगवती - दुर्गा - प्रसाद - सिद्ध्यर्थं च नमो - युत - प्रणव - वाग्वीज - स्व - वीज - लोम - विलोम - पुटितोक्त - सप्तम - शतकस्य त्रयष्षष्टि - मन्त्र - जपे विनियोगः।

ऋष्यादि - न्यासः— श्री मार्कण्डेय - ऋषये नमः सहस्रारे—शिरसि, श्रीमहा - सरस्वती - देवतायै नमः द्वादशारे—हृदि, प्रें बीजाय नमः षडारे—लिङ्गे, श्री अन्तर्गोप्त्री - शक्त्यै नमः दशारे—नाभौ, श्रीतारा - महा - विद्यायै नमः षोडशारे—कण्ठे, सतो - गुणाय नमः अन्तरारे - मनसि, त्वक् - ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त - रसाय नमः चेतसि, लिङ्ग - कर्मेन्द्रियाय नमः लिङ्ग - कर्मेन्द्रिये, सौम्य - स्वराय नमः कण्ठ - मूले, आकाश - तत्त्वाय नमः चतुरारे—गुदे, परा - शान्ति - कलायै नमः कर - तले, ह्रौं ॐ ऐं उत्कीलनाय नमः, पादयोः, बोधिनी - मुद्रायै नमः सर्वाङ्गे, मम क्षेम - स्थैर्यायुरारोग्याभि - वृद्ध्यर्थं श्रीजगदम्बा - योगमाया - भगवती - दुर्गा - प्रसाद - सिद्ध्यर्थं च नमो - युत - प्रणव - वाग्वीज - स्व - वीज - लोम - विलोम - पुटितोक्त - सप्तम - शतकस्य त्रयष्षष्टि - मन्त्र - जपे विनियोगाय नमः अञ्जलौ।

	कर - न्यासः	**षडङ्ग - न्यासः**
ॐ ऐं प्रें	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
पश्यतामेव देवानां	मध्यमाभ्यां वषट्	शिखायै वषट्
तत्रैवान्तरधीयत	अनामिकाभ्यां हुम्	कवचाय हुम्
तेऽपि देवा निरातङ्काः	कनिष्ठिकाभ्यां वौषट्	नेत्र - त्रयाय वौषट्
स्वाधिकारान् यथा पुरा	करतल - कर - पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं —**एकैकं तव देवि! जन्म ह्यनघं स - व्यंजना व्यंजनम्,**

कूटस्थं यदि वा पृथक् क्रम - गतं यद्वा स्थितं व्युत्क्रमात्।

यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,

जप्तं वा सफली - करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं प्रें नमः पश्यतामेव देवानां, तत्रैवान्तरधीयत।

तेऽपि देवा निरातङ्का, स्वाधिकारान् यथा पुरा नमो प्रें ऐं ॐ॥६६३॥

१००० जपात् सिद्धिः, घृत - हव्येन होमः।

***

६६४

विनियोगः— ॐ अस्य श्री **'यज्ञ-भाग-भुजः सर्वे'** इति सप्तशती-सप्तम-शतकस्य चतुष्षष्टि-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहा-सरस्वती देवता, द्रूं वीजं, जया शक्तिः, श्रीतारा महा-विद्याः, रजो गुणः, त्वक् ज्ञानेन्द्रियं, शान्त रसः, योनि कर्मेन्द्रियं, सौम्य स्वरः, जल तत्त्वं, प्रतिष्ठा कला, ऐं उत्कीलनं, वोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त -सप्तम-शतकस्य चतुष्षष्टि-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीवेद-व्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, द्रूं बीजाय नमः षडारे—लिङ्गे, जया-शक्त्यै नमः दशारे—नाभौ, श्रीतारा-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे-मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, योनि-कर्मेन्द्रियाय नमः योनि-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः कर-तले, ऐं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य चतुष्षष्टि-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं द्रूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
यज्ञ-भाग-भुजः सर्वे	मध्यमाभ्यां वषट्	शिखायै वषट्
चक्रुर्विनिहतारयः	अनामिकाभ्यां हुम्	कवचाय हुम्
दैत्याश्च देव्या निहते	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
शुम्भे देव-रिपौ युधि	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **एकैकं तव देवि! जन्म ह्यनघं स-व्यंजना व्यंजनम्,**
कूटस्थं यदि वा पृथक् क्रम-गतं यद्वा स्थितं व्युत्क्रमात्।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली-करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं द्रूं नमः यज्ञ-भाग-भुजः सर्वे, चक्रुर्विनिहतारयः।
दैत्याश्च देव्या निहते, शुम्भे देव-रिपौ युधि नमो द्रूं ऐं ॐ॥ ६६४॥

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६६५

विनियोगः— ॐ अस्य श्री **'जगद्-विध्वंसिनि तस्मिन्'** इति सप्तशती-सप्तम-शतकस्य पञ्च-षष्टि-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहा-सरस्वती देवता, क्लूं बीजं, श्रीचण्डी शक्तिः, श्रीभैरवी-काली महा-विद्याः, तमो गुणः, त्वक् ज्ञानेन्द्रियं, शान्त रसः, पद कर्मेन्द्रियं, सौम्य स्वरः, अग्नि तत्त्वं, विद्या कला, ह्रीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य पञ्च-षष्टि-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीवेद-व्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, क्लूं बीजाय नमः षडारे—लिङ्गे, श्रीचण्डी-शक्त्यै नमः दशारे—नाभौ, श्रीभैरवी-काली-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे-मनसि, त्वक्-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, पद-कर्मेन्द्रियाय नमः पद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, ह्रीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्वा-योगमाया-भगवति-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य पञ्च-षष्टि-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्लूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
जगद्-विध्वंसिनि तस्मिन्	मध्यमाभ्यां वषट्	शिखायै वषट्
महोग्रेऽतुल-विक्रमे	अनामिकाभ्यां हुम्	कवचाय हुम्
निशुम्भे च महा-वीर्ये	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
शेषाः पातालमाययुः	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **एकैकं तव देवि! जन्म ह्यनघं स-व्यंजना व्यंजनम्,**
कूटस्थं यदि वा पृथक् क्रम-गतं यद्वा स्थितं व्युत्क्रमात्।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली-करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं क्लूं नमः जगद्-विध्वंसिनि तस्मिन्, महोग्रेऽतुल-विक्रमे।
निशुम्भे च महा-वीर्ये, शेषाः पातालमाययुः नमो क्लूं ऐं ॐ॥ ६६५॥

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६६६

विनियोगः— ॐ अस्य श्री **'एवं भगवती देवी'** इति सप्तशती-सप्तम-शतकस्य षट्-षष्टि-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-सरस्वती देवता, औं बीजं, श्री विजया शक्तिः, श्रीभुवनेश्वरी महा-विद्याः, रजो गुणः, घ्राण ज्ञानेन्द्रियं, शान्त रसः, गुद कर्मेन्द्रियं, सौम्य स्वरः, भू तत्त्वं, निवृत्ति कला, ऐं ह्रीं उत्कीलनं, वोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थ श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थ च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य षट्-षष्टि-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, औं बीजाय नमः षडारे—लिङ्गे, श्रीविजया-शक्त्यै नमः दशारे—नाभौ, श्रीभुवनेश्वरी-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे-मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, गुद-कर्मेन्द्रियाय नमः गुद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे—गुदे, निवृत्ति-कलायै नमः कर-तले, ऐं ह्रीं उत्कीलनाय नमः पादयोः, वोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य षट्-षष्टि-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं औं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
एवं भगवती देवी	मध्यमाभ्यां वषट्	शिखायै वषट्
सा नित्याऽपि पुनः पुनः	अनामिकाभ्यां हुम्	कवचाय हुम्
सम्भूय कुरुते भूप!	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
जगतः परि-पालनं	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **एकैकं तव देवि! जन्म ह्यनघं स-व्यंजना व्यंजनम्,**
कूटस्थं यदि वा पृथक् क्रम-गतं यद्वा स्थितं व्युत्क्रमात्।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली-करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं औं नमः एवं भगवती देवी, सा नित्याऽपि पुनः पुनः।
सम्भूय कुरुते भूप! जगतः परि-पालनम् नमो औं ऐं ॐ॥ ६६६॥

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६६७

विनियोगः— ॐ अस्य श्री **'तयैतन्मोह्यते विश्वं'** इति सप्तशती-सप्तम-शतकस्य सप्त-षष्टि-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-सरस्वती देवता, सूं बीजं, अयोनिजा शक्तिः, श्रीपीताम्बरा महा-विद्याः, रजो गुणः, रसना ज्ञानेन्द्रियं, शान्त रसः, वाक् कर्मेन्द्रियं, सौम्य स्वरः, भू तत्त्वं, निवृत्ति कला, ल्हीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्बीज-स्व-बीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य सप्त-षष्टि-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, सूं बीजाय नमः षडारे—लिङ्गे, अयोनिजा-शक्त्यै नमः दशारे—नाभौ, श्रीपीताम्बरा-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे-मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे—गुदे, निवृत्ति-कलायै नमः कर-तले, ल्हीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्बीज-स्व-बीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य सप्त-षष्टि-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं सूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
तयैतन्मोह्यते विश्वं	मध्यमाभ्यां वषट्	शिखायै वषट्
सैव विश्वं प्रसूयते	अनामिकाभ्यां हुम्	कवचाय हुम्
सा याचिता च विज्ञानं	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
तुष्टा ऋद्धिं प्रयच्छति	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **एकैकं तव देवि! जन्म ह्यनघं स-व्यंजना व्यंजनम्,**
कूटस्थं यदि वा पृथक् क्रम-गतं यद्वा स्थितं व्युत्क्रमात्।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं,
जप्तं वा सफली-करोति तरसा तं तं समस्तं नृणाम्॥

ॐ ऐं सूं नमः तयैतन्मोह्यते विश्वं, सैव विश्वं प्रसूयते।
सा याचिता च विज्ञानं, तुष्टा ऋद्धिं प्रयच्छति नमो सूं ऐं ॐ॥६६७॥

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६६८

विनियोगः— ॐ अस्य श्री **'व्याप्तं तयैतत् सकलं'** इति सप्तशती-सप्तम-शतकस्य अष्टा-षष्टि-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-काली देवता, चें बीजं, श्रीशताक्षी शक्तिः, श्रीकाली ज्येष्ठा महा-विद्याः, तमो गुणः, घ्राण ज्ञानेन्द्रियं, शान्त रसः, योनि कर्मेन्द्रियं, सौम्य स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य अष्टा-षष्टि-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, चें बीजाय नमः षडारे—लिङ्गे, श्रीशताक्षी-शक्त्यै नमः दशारे—नाभौ, श्रीकाली-ज्येष्ठा-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे-मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, योनि-कर्मेन्द्रियाय नमः योनि-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य अष्टा-षष्टि-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं चें	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
व्याप्तं तयैतत् सकलं	मध्यमाभ्यां वषट्	शिखायै वषट्
ब्रह्माण्डं मनुजेश्वर!	अनामिकाभ्यां हुम्	कवचाय हुम्
महा-काल्या महा-काले	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
महा-मारी-स्वरूपया	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **खड्गं चक्र-गदेषु-चाप-परिघान् शूलं भुशुण्डीं शिरः।**
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग-भूषावृतां।।
नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम्।
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्।।

ॐ ऐं चें नमः व्याप्तं तयैतत् सकलं, ब्रह्माण्डं मनुजेश्वर!
महा-काल्या महा-काले, महा-मारी-स्वरूपया नमो चें ऐं ॐ।।६६८।।

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६६६

विनियोगः— ॐ अस्य श्री **'सैव काले महा-मारी'** इति सप्तशती-सप्तम-शतकस्य ऊन-सप्तति-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-काली देवता, हूं बीजं, श्रीशताक्षी शक्तिः, श्रीछिन्नमस्ता महा-विद्याः, तमो गुणः, रसना ज्ञानेन्द्रियं, शान्त रसः, वाक्-कर्मेन्द्रियं, सौम्य स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्बीज-स्व-बीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य ऊन-सप्तति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्त्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, हूं बीजाय नमः षडारे—लिङ्गे, श्रीशताक्षी-शक्त्यै नमः दशारे—नाभौ, श्रीछिन्नमस्ता-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे-मनसि, रसना-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्बीज-स्व-बीज-लोम-विलोम-पुटितोक्त -सप्तम-शतकस्य ऊन-सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं हूं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
सैव काले महा-मारी	मध्यमाभ्यां वषट्	शिखायै वषट्
सैव सृष्टिर्भवत्यजा	अनामिकाभ्यां हुम्	कवचाय हुम्
स्थितिं करोति भूतानां	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सैव काले सनातनी	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **खड्गं चक्र-गदेषु-चाप-परिघान् शूलं भुशुण्डीं शिरः।**
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग-भूषावृताम्॥
नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम्।
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

ॐ ऐं हूं नमः सैव काले महा-मारी, सैव सृष्टिर्भवत्यजा।
स्थितिं करोति भूतानां, सैव काले सनातनी नमो हूं ऐं ॐ॥ ६६६॥

१००० जपात् सिद्धि, घृत-हव्येन होमः।

***

६७०

विनियोगः— ॐ अस्य श्री **'भव-काले नृणां सैव'** इति सप्तशती-सप्तम-शतकस्य सप्तति-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-लक्ष्मी देवता, प्लीं वीजं, श्रीमाया शक्तिः, श्रीकमला-महा-विद्याः, रजो गुणः, चक्षु ज्ञानेन्द्रियं, शान्त रसः, कर कर्मेन्द्रियं, सौम्य स्वरः, वायु तत्त्वं, शान्ति कला, श्रीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य सप्तति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, प्लीं बीजाय नमः षडारे—लिङ्गे, श्रीमाया-शक्त्यै नमः दशारे—नाभौ, श्रीकमला-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे-मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः कर-तले, श्रीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं प्लीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
भव-काले नृणां सैव	मध्यमाभ्यां वषट्	शिखायै वषट्
लक्ष्मीर्वृद्धि-प्रदा गृहे	अनामिकाभ्यां हुम्	कवचाय हुम्
सैवाऽभावे तथाऽलक्ष्मीः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
विनाशायोप-जायते	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम्,**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रवाल-प्रभां,
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम्॥

ॐ ऐं प्लीं नमः भव-काले नृणां सैव, लक्ष्मीर्वृद्धि-प्रदा गृहे।
सैवाऽभावे तथाऽलक्ष्मीर्विनाशायोप-जायते नमो प्लीं ऐं ॐ॥ ६७०॥

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६७१

विनियोगः— ॐ अस्य श्री **'स्तुता सम्पूजिता पुष्पैः'** इति सप्तशती-सप्तम-शतकस्य एक-सप्तति-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-लक्ष्मी देवता, क्षां बीजं, श्रीमाया शक्तिः, श्रीमातङ्गी महा-विद्याः, रजो गुणः, श्रोत्र ज्ञानेन्द्रियं, शान्त रसः, लिङ्ग कर्मेन्द्रियं, सौम्य स्वरः, वायु तत्त्वं, शान्ति कला, श्रीं उत्कीलनं, वोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य एक-सप्तति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, क्षां बीजाय नमः षडारे—लिङ्गे, श्रीमाया-शक्त्यै नमः दशारे—नाभौ, श्रीमातङ्गी-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे-मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, लिङ्ग-कर्मेन्द्रियाय नमः लिङ्ग-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः कर-तले, श्रीं उत्कीलनाय नमः पादयोः, वोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्वा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य एक-सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं क्षां	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
स्तुता सम्पूजिता पुष्पैः	मध्यमाभ्यां वषट्	शिखायै वषट्
धूप-गन्धादिभिस्तथा	अनामिकाभ्यां हुम्	कवचाय हुम्
ददाति वित्तं पुत्रांश्च	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
मतिं धर्मे गतिं शुभाम्	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम्,**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रवाल-प्रभां,
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम्॥

ॐ ऐं क्षां नमः स्तुता सम्पूजिता पुष्पैर्धूप-गन्धादिभिस्तथा।
ददाति वित्तं पुत्रांश्च, मतिं धर्मे गतिं शुभाम् नमो क्षां ऐं ॐ॥६७१॥

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

॥ इति श्रीमार्कण्डेय-पुराणे सावर्णिके मन्वन्तरे देवी-माहात्म्ये फल-स्तुतिः नाम द्वादशोऽध्यायः ॥१२॥
(श्लोकाः ३७, अर्द्ध-श्लोक २, उवाच २, एवमादितो ६७१)

***

ॐ ह्रीं श्रीसरस्वत्यै नमः। श्रीगणेशाय नमः। श्रीआदि-नाथाय नमः।

तृतीय चरित (शुम्भ-निशुम्भ-वधः)

त्रयोदशः अध्यायः

६७२

विनियोगः— ॐ अस्य श्री **'ऋषिरुवाच'** इति सप्तशती-सप्तम-शतकस्य द्वा-सप्तति-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहा-सरस्वती देवता, श्रौं वीजं, त्राणकारी शक्तिः, श्रीभैरवी महा-विद्याः, सतो गुणः, चक्षु ज्ञानेन्द्रियं, शान्त रसः, कर-कर्मेन्द्रियं, सौम्य स्वरः, भू तत्त्वं, निवृत्ति कला, ऐं उत्कीलनं, ताडिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्वा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त -सप्तम-शतकस्य द्वा-सप्तति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीवेद-व्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, श्रौं बीजाय नमः षडारे—लिङ्गे, त्राणकारी-शक्त्यै नमः दशारे—नाभौ, श्रीभैरवी-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे-मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, शान्त-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, भू-तत्त्वाय नमः चतुरारे—गुदे, निवृत्ति-कलायै नमः कर-तले, ऐं उत्कीलनाय नमः पादयोः, ताडिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्वा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य द्वा-सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमो	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
श्रौं नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं श्रौं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
ऋषिरुवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्॥
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि-दैत्यार्दिनीम्॥

ॐ ऐं श्रौं नमः **ऋषिरुवाच** **नमो श्रौं ऐं ॐ॥ ६७२॥**

१००० जपात् सिद्धिः, घृत-हव्येन होमः।

***

६७३

विनियोगः— ॐ अस्य श्री **'एतत् ते कथितं भूप!'** इति सप्तशती-सप्तम-शतकस्य त्रयस्सप्तति-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-सरस्वती देवता, व्रीं वीजं, भीमा शक्तिः, श्रीभैरवी महा-विद्याः, सतो गुणः, चक्षु ज्ञानेन्द्रियं, सौम्य रसः, पद कर्मेन्द्रियं, सौम्य स्वरः, वायु तत्त्वं, शान्ति कला, ऐं ह्रीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्वा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य त्रय-सप्तति-मन्त्र-जपे विनियोगः ।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, व्रीं बीजाय नमः षडारे—लिङ्गे, भीमा-शक्त्यै नमः दशारे—नाभौ, श्रीभैरवी-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे-मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, पद-कर्मेन्द्रियाय नमः पद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः कर-तले, ऐं ह्रीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त -सप्तम-शतकस्य त्रयस्सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ व्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
एतत् ते कथितं भूप!	मध्यमाभ्यां वषट्	शिखायै वषट्
देवी-माहात्म्यमुत्तमम्	अनामिकाभ्यां हुम्	कवचाय हुम्
एवं प्रभावा सा देवी	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
ययेदं धार्यते जगत्	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम् ।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम् ।।
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि-दैत्यार्दिनीम् ।।

ॐ ऐं व्रीं नमः एतत् ते कथितं भूप! देवी-माहात्म्यमुत्तमम् ।
एवं प्रभावा सा देवी, ययेदं धार्यते जगत् नमो व्रीं ऐं ॐ ।। ६७३ ।।

१००० जपात् सिद्धिः, घृत-तिल-हव्येन होमः ।

***

६७४

विनियोगः— ॐ अस्य श्री **'विद्या तथैव क्रियते'** इति सप्तशती-सप्तम-शतकस्य चतुस्सप्तति-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-लक्ष्मी देवता, ओं बीजं, श्री मीनाक्षी शक्तिः, श्रीमातङ्गी महा-विद्याः, रजो गुणः, चक्षु ज्ञानेन्द्रियं, सौम्य रसः, पद-कर्मेन्द्रियं, सौम्य स्वरः, जल तत्त्वं, प्रतिष्ठा कला, श्रीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त -सप्तम-शतकस्य चतुस्सप्तति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, ओं बीजाय नमः षडारे—लिङ्गे, श्री मीनाक्षी-शक्त्यै नमः दशारे—नाभौ, श्रीमातङ्गी-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे-मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, पद-कर्मेन्द्रियाय नमः पद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः कर-तले, श्रीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य चतुस्सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ओं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
विद्या तथैव क्रियते	मध्यमाभ्यां वषट्	शिखायै वषट्
भगवद्-विष्णु-मायया	अनामिकाभ्यां हुम्	कवचाय हुम्
त्वया त्वमेष वैश्यश्च	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
तथैवान्ये विवेकिनः	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम्,**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रवाल-प्रभां,
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम्॥

ॐ ऐं ओं नमः विद्या तथैव क्रियते, भगवद्-विष्णु-मायया।
त्वया त्वमेष वैश्यश्च, तथैवान्ये विवेकिनः नमो ओं ऐं ॐ॥ ६७४॥

१००० जपात् सिद्धिः, घृत-तिल-हव्येन होमः।

***

६७५

विनियोगः— ॐ अस्य श्री **'मोह्यन्ते मोहिताश्चैव'** इति सप्तशती-सप्तम-शतकस्य पञ्च-सप्तति-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-काली देवता, औं बीजं, श्री काल-रात्रिः शक्तिः, श्रीकाली महा-विद्याः, तमो गुणः, चक्षु ज्ञानेन्द्रियं, सौम्य रसः, पद-कर्मेन्द्रियं, सौम्य स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य पञ्च-सप्तति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, औं बीजाय नमः षडारे—लिङ्गे, श्री काल-रात्रि-शक्त्यै नमः दशारे—नाभौ, श्रीकाली-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे-मनसि, चक्षु-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, पद-कर्मेन्द्रियाय नमः पद-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य पञ्च-सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं औं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
मोह्यन्ते मोहिताश्चैव	मध्यमाभ्यां वषट्	शिखायै वषट्
मोहमेष्यन्ति चापरे	अनामिकाभ्यां हुम्	कवचाय हुम्
तामुपैहि महा-राज!	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
शरणं परमेश्वरीम्	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **खड्गं चक्र-गदेषु-चाप-परिघान् शूलं भुशुण्डीं शिरः।**
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग-भूषावृताम्॥
नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम्।
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

ॐ ऐं औं नमः मोह्यन्ते मोहिताश्चैव, मोहमेष्यन्ति चापरे।
तामुपैहि महा-राज! शरणं परमेश्वरीम् नमो औं ऐं ॐ॥६७५॥

१००० जपात् सिद्धिः, घृत-तिल-हव्येन होमः।

***

६७६

विनियोगः— ॐ अस्य श्री **'आराधिता सैव नृणां'** इति सप्तशती-सप्तम-शतकस्य षट्-सप्तति-मन्त्रस्य श्रीमेधस ऋषिः, श्रीमहा-लक्ष्मी देवता, ह्रां वीजं, श्री मीनाक्षी शक्तिः, श्रीकमला महा-विद्याः, रजो गुणः, श्रोतृ ज्ञानेन्द्रियं, सौम्य रसः, कर-कर्मेन्द्रियं, सौम्य स्वरः, जल तत्त्वं, प्रतिष्ठा कला, श्रीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य षट्-सप्तति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमेधस-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, ह्रां बीजाय नमः षडारे—लिङ्गे, श्री मीनाक्षी-शक्त्यै नमः दशारे—नाभौ, श्रीकमला-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे-मनसि, श्रोत्र-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः कर-तले, श्रीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य षट्-सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ॐ ह्रां नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं ह्रां नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
आराधिता सैव नृणां	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
भोग-स्वर्गापवर्गदा	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम्,**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रवाल-प्रभां,
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम्॥

ॐ ऐं ह्रां नमः आराधिता सैव नृणां, भोग-स्वर्गापवर्गदा नमो ह्रां ऐं ॐ॥६७६॥

१००० जपात् सिद्धिः, घृत-तिल-हव्येन होमः।

***

६७७

विनियोगः— ॐ अस्य श्री **'मार्कण्डेय उवाच'** इति सप्तशती-सप्तम-शतकस्य सप्त-सप्तति-मन्त्रस्य श्रीवेद-व्यास ऋषिः, श्रीमहा-सरस्वती देवता, श्रीं वीजं, श्रीब्रह्म-चारिणी शक्तिः, श्रीभैरवी महा-विद्याः, सतो गुणः, श्रोतृ ज्ञानेन्द्रियं, सौम्य रसः, कर-कर्मेन्द्रियं, सौम्य स्वरः, जल तत्त्वं, प्रतिष्ठा कला, ऐं उत्कीलनं, वोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्वा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त -सप्तम-शतकस्य सप्त-सप्तति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीवेद-व्यास-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-सरस्वती-देवतायै नमः द्वादशारे—हृदि, श्रीं बीजाय नमः षडारे—लिङ्गे, श्रीब्रह्म-चारिणी-शक्त्यै नमः दशारे—नाभौ, श्रीभैरवी-महा-विद्यायै नमः षोडशारे—कण्ठे, सतो-गुणाय नमः अन्तरारे-मनसि, श्रोतृ-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, जल-तत्त्वाय नमः चतुरारे—गुदे, प्रतिष्ठा-कलायै नमः कर-तले, ऐं उत्कीलनाय नमः पादयोः, वोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्वा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य सप्त-सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमो	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमो	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
श्रीं नमो	मध्यमाभ्यां वषट्	शिखायै वषट्
नमो नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ ऐं श्रीं नमः	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
मार्कण्डेय उवाच	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकम्।**
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम्॥
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा—
पूर्वामत्र सरस्वतीमनुभजे शुम्भादि-दैत्यार्दिनीम्॥

ॐ ऐं श्रीं नमः मार्कण्डेय उवाच नमो श्रीं ऐं ॐ॥६७७॥

१००० जपात् सिद्धिः, घृत-तिल-हव्येन होमः।

***

६७८

विनियोगः— ॐ अस्य श्री **'इति तस्य वचः श्रुत्वा'** इति सप्तशती-सप्तम-शतकस्य अष्ट-सप्तति-मन्त्रस्य श्रीमार्कण्डेय ऋषिः, श्रीमहा-काली देवता, श्रां बीजं, श्रीकामाक्षा शक्तिः, श्रीकाली महा-विद्याः, तमो गुणः, श्रोतृ ज्ञानेन्द्रियं, सौम्य रसः, कर-कर्मेन्द्रियं, सौम्य स्वरः, अग्नि तत्त्वं, विद्या कला, क्रीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य अष्ट-सप्तति-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमार्कण्डेय-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-काली-देवतायै नमः द्वादशारे—हृदि, श्रां बीजाय नमः षडारे—लिङ्गे, श्रीकामाक्षा-शक्त्यै नमः दशारे—नाभौ, श्रीकाली-महा-विद्यायै नमः षोडशारे—कण्ठे, तमो-गुणाय नमः अन्तरारे-मनसि, श्रोतृ-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, कर-कर्मेन्द्रियाय नमः कर-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, अग्नि-तत्त्वाय नमः चतुरारे—गुदे, विद्या-कलायै नमः कर-तले, क्रीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त -सप्तम-शतकस्य अष्ट-सप्तति-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ऐं नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
श्रां नमः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं श्रां नमः	अनामिकाभ्यां हुम्	कवचाय हुम्
इति तस्य वचः श्रुत्वा	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सुरथः स नराधिपः	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **खड्गं चक्र-गदेषु-चाप-परिघान् शूलं भुशुण्डीं शिरः।**
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्ग-भूषावृताम्॥
नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम्।
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

ॐ ऐं श्रां नमः इति तस्य वचः श्रुत्वा, सुरथः स नराधिपः नमो श्रां ऐं ॐ॥ ६७८॥

१००० जपात् सिद्धिः, घृत-तिल-हव्येन होमः।

***

६७६

विनियोगः— ॐ अस्य श्री **'प्रणिपत्य महा-भागं'** इति सप्तशती-सप्तम-शतकस्य नव-सप्तत-मन्त्रस्य श्रीमार्कण्डेय ऋषिः, श्रीमहा-लक्ष्मी देवता, ओं बीजं, श्रीकात्यायनी शक्तिः, श्रीकमला महा-विद्याः, रजो गुणः, घ्राण ज्ञानेन्द्रियं, सौम्य रसः, वाक्-कर्मेन्द्रियं, सौम्य स्वरः, वायु तत्त्वं, शान्ति कला, श्रीं उत्कीलनं, बोधिनी मुद्रा, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य नव-सप्तत-मन्त्र-जपे विनियोगः।

ऋष्यादि-न्यासः— श्रीमार्कण्डेय-ऋषये नमः सहस्रारे—शिरसि, श्रीमहा-लक्ष्मी-देवतायै नमः द्वादशारे—हृदि, ओं बीजाय नमः षडारे—लिङ्गे, श्रीकात्यायनी-शक्त्यै नमः दशारे—नाभौ, श्रीकमला-महा-विद्यायै नमः षोडशारे—कण्ठे, रजो-गुणाय नमः अन्तरारे-मनसि, घ्राण-ज्ञानेन्द्रियाय नमः ज्ञानेन्द्रिये, सौम्य-रसाय नमः चेतसि, वाक्-कर्मेन्द्रियाय नमः वाक्-कर्मेन्द्रिये, सौम्य-स्वराय नमः कण्ठ-मूले, वायु-तत्त्वाय नमः चतुरारे—गुदे, शान्ति-कलायै नमः कर-तले, श्रीं उत्कीलनाय नमः पादयोः, बोधिनी-मुद्रायै नमः सर्वाङ्गे, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं श्रीजगदम्बा-योगमाया-भगवती-दुर्गा-प्रसाद-सिद्ध्यर्थं च नमो-युत-प्रणव-वाग्वीज-स्व-वीज-लोम-विलोम-पुटितोक्त-सप्तम-शतकस्य नव-सप्तत-मन्त्र-जपे विनियोगाय नमः अञ्जलौ।

	कर-न्यासः	**षडङ्ग-न्यासः**
ॐ ऐं ओं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
नमो नमः	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
प्रणिपत्य महा-भागं	मध्यमाभ्यां वषट्	शिखायै वषट्
तम् ऋषिं शंसित-व्रतम्	अनामिकाभ्यां हुम्	कवचाय हुम्
निर्विण्णोऽति-ममत्वेन	कनिष्ठिकाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
राज्यापहरणेन च	करतल-कर-पृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानं— **अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम्,**
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रवाल-प्रभाम्,
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम्॥

ॐ ऐं ओं नमः प्रणिपत्य महा-भागं, तमृ ऋषिं शंसित-व्रतम्।
निर्विण्णोऽति-ममत्वेन, राज्यापहरणेन च नमो ओं ऐं ॐ॥६७६॥

१००० जपात् सिद्धिः, घृत-तिल-हव्येन होमः।

***

६८०

